तुलसीदासकृत रामचरितमानस के अरण्यकाण्ड में श्रीरामचन्द्रजी जब मुनि अत्रि की कुटिया में प्रवेश हुऐ , तव मुनि ने हर्ष से यह स्तुति गाई ।

नमामि भक्त वत्सलं । कृपालु शील कोमलं । भजामि ते पदांबुजं । अकामिनां स्वधामदं।। 1।।
निकाम श्याम सुंदरं । भवांबुनाथ मंदरं । प्रफुल्ल कंज लोचनं । मदादि दोष मोचनं ।।2।।
प्रलंब बाहु विक्रमं । प्रभोऽप्रमेय वैभवं । निषंग चाप सायकं । धरं त्रिलोक नायकं ।।3।।
दिनेश वंश मंडनं । महेश चाप खंडनं । मुनींद्र संत रंजनं । सुरारि वृंद भंजनं ।।4।।
मनोज वैरि वंदितं । अजादि देव सेवितं । विशुद्ध बोध विग्रहं । समस्त दूषणापहं ।।5।।
नमामि इंदिरां पतिं । सुखाकरं सतां गतिं । भजे सशक्ति सानुजं । शती पति प्रियानुजं ।।6।।
त्वदंघ्रि मूल ये नराः । भजन्ति हीन मत्सराः । पतन्ति नो भवार्णवे । वितर्क वीचि संकुले ।।7।।
विविक्त वासिनं सदा । भजन्ति मुक्तये मुदा । निरस्य इंद्रियादिकं । प्रयांति ते गतिं स्वकं ।।8।।
तमेकमद्भुतं प्रभुं । निरीहमीश्वरं विभुं । जगद्गुरुम् च शाश्वतं । तुरीयमेव केवलं ।।9।।
भजामि भाव वल्लभं । कुयोगिनां सुदुर्लभं । स्वभक्त कल्प पादपं । समं सुसेव्यमन्वहं ।।10।।
अनूप रूप भूपतिं । नतो हमुर्विजा पतिं । प्रसीद मे नमामि ते । पदाब्ज भक्ति देहि मे ।।11।।
पठन्ति ये स्तवं इदं । नरादरेण ते पदं । व्रजन्ति नात्र संशयं । त्वदीय भक्ति संयुताः ।। 12।।

* * *